This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

4568

इत्यनुवर्तनएवेति शवादीनांसार्वधातुकत्वाद्यथेमितिभावः तेनल्सार्वधातुकानुदात्तत्वसिद्धिः इतिदिगिति शमिधातोरि
तिसूत्रान्नदनुवृत्यासिद्धस्थाथेएवायमितिदिग्थैः कृत्याइत्यधिकारस्थेतिश्रुतएवरगवुल्तृचोस्तव्यदादिषुपाठोनाक
रणस्सूत्रेदंभाष्ये चाधस्तनीतियेनन्यायेनेतिभावः भाष्येणयतात्पर्यायः कृत्यशेष्यइत्यवापइत्यस्यसंबंधमा
प्रित्यपकाव्यवधानेसमाहितंनतदादित्वमितितद्धानित्यर्थः गुरुभूतलक्षेशसाध्यनियमार्थत्वेचलक्ष्यानुसारिभाष्यमेमानकु
लमान्नेतिश्रुतएवकार्यातएणिप्राकृतानिएयनोनभवन्ति भूतश्चादिपितिस्त्रार्धधातुकेविवक्षितेऽकारलोपइतिभावः सस्थ
चेदंभाष्यइतिभावइतियद्यपिप्रत्ययः परश्चेतिशास्त्रादार्धधातुकस्यपरत्वेनैवविवक्षितेपरयुक्तनिमित्तत्वेनपरनिमित्तत्व
मस्त्यवस्थश्चेदंक्ङितोर्लुगनपत्यइत्यत्राकरोतथापित्रार्धधातुकइत्यादेः परसप्तमीलेइदमूलमितितंदरिद्रातेरातोलो
पेदरिद्रइत्यत्रयत्नेनोनेविशेषः यदनस्यह्यकृत्वाभावात्तदातिदधात्योरितित्रानेनहिणाभाग्नेशोधीयतेत्रानुवृ
त्तेकांतत्वेतुनेदंसिध्यति एणश्वादीनांवाक्यार्थबोधोत्तरप्रत्ययत्वज्ञानेएवेत्संज्ञापरत्वोपदेशज्ञानकालमेवप्रकृतेरपरि
ज्ञानंतन्निधानकृतासारूप्यंदुर्निवारत्वात् पूर्वेणेतिपोरदुपधादित्यनेनतस्मिन्नितिनिमित्तइतितत्र (सा)धुरितिप्राग्धातीयइत्यर्थः
षष्ठ्याऽऽदीरत्वादिनित्रबृतत्वादितिभावः नचात्रतद्धिताधिकाराक्षयंप्राप्तिःकृदंतशक्योपस्थितार्थनिरूपितकर्तृत्व
सत्वेनात्रभाग्नेःकृतपूर्वीत्यत्रतुनेवंतत्रहकृदंतस्यस्वातंत्र्येणकाप्रयोगाभावेनप्रकृत्यादशायामपिकृदंत
शक्त्योपस्थितार्थकर्मत्वाभावात्तद्धिताधिकारइत्यस्यापितद्धितोनशक्तिमात्रसत्कारेणोपस्थितक्रियाकर्तृकर्मणोने

Acc. No. 4568
Title - लघुशब्दरत्न. (Some portion कृदन्त, वैदिकी only)
Author - हरिदीक्षित.
Date - शके 1787
Sub - व्याकरण
folio - 10
Xerox - 20
K K S U LIBRARY
RAMTEK
441 106
M-1873
Dist Nagpur
Checked 2012
CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यर्थे इतिभावः करणे त्वविवक्षयेतिकर्तुः करणे त्वविवक्षयेत्यर्थः मनमाश्रित्येनेनतन्मतस्यपूर्वोक्तस्वरीत्याऽयुक्तत्वंसूचितंतेनास्यपरिहारस्याय
क्तत्वंसूचितं इतिदिग्गिति अत्रपक्षेकृत्यानामितिसूत्रेविभक्तेनकर्तरिवेत्यनेनानुभयपदार्थविषयेणविकल्पाच्चतीयेतिबोध्यं नमभवतीतिसंज्ञा
पूर्वं केत्यस्यासत्वेपिभयमोपस्थितत्वयाधावेक्षयापुश्चात्यत्वद्विधायकभाष्यम् योगान्न्याय्यइतिबोध्यं नियमोनास्तीतिदाने
नुनियमएवेतिभावः संभवेकरणेयाच्ञारूपंकर्तृकरणइत्यत्रकरणस्वीकारस्तत्रनिरोधएवेतिभावः सर्वानियमेति भाष्यकृद्विधो
दत्तोग्रहणेकर्तव्यंइहमाभूतवार्यात्रस्त्रियांइतिकर्मणिनिरुपपदोदाहरणादितिभावः इउ इतिअनयवर्णद्वंद्वेअत्रेभसिद्धत्वादिगण एव
ग्रहणेनेनाध्येयमेतिसिद्धं आत्मनेपदेनइति आत्मनेपदकारवृद्धिकरणभक्तिभजेऽर्थेऽसाहचर्येणताध्यात्मनेपदेनएवत्रा
र्थेजोदशद्वंद्वग्रहण एतेनपूर्वोत्तरसाहचर्यादीडितिसूत्रे उभयपदिनोग्रहणमित्यपास्तं पूर्वोत्तरयोरेकस्योभयपदित्वाभावाच्च
तिभावःविषयसप्तमीति इदंवाचःकर्तृकर्मणीतिसूत्रेभाष्यस्पष्टं परमन्नम्याश्रयणादिति वस्तुतोविषयसप्तमीत्वेपिपेविभावेस
त्तेनादिसाहचर्येणपाद्यस्योत्पत्तिकालेनानत्वनेरत्वेनेत्वविधानेनात्रतदप्राप्तिरितिबोध्यं त्वत्समयोनेति वदःसुपीतिच
कारात्साध्यइत्यर्थः नदृतेनापीतियत्नेतिशेषः इतिदिग्गिति उपपदसमासतत्पुरुषस्वरासिद्धिरर्थः ममत्वमेतिलुप्तसप्तमीतिं
देशात्तत्सिद्धमितिबोध्यंकिंचामावस्यमितिसहस्यंयतोनावइत्याद्युदात्तंसादतस्वरितेत्विष्यतेइतिबोध्यं लिंगाच्चेतिनियतद्वंद्वतोस्त
त्स्वरविधानेत्लिंगमितिभावःभाष्यादीतिनत्रोभयविषयवार्तिकस्येवपाठादितिभावः उपपदसमासासंभवेपीति उपपदत्वाभावादि
तिभावः ततएवकृदुत्तरपदप्रकृतिस्वरापीत्यपिबोध्यः सानुबंधकत्वादितिनचानयालुग्विकरणे परिभाषयाचोभयोर्ग्रहणापत्तिरिति
वाच्यं तुदिस्रयतिपो तो सादोप्रसिद्धत्वेनयोतेरेवग्रहणमित्याशयात् योनिरिति उत्पत्तिस्थानमित्यर्थः सायस्मिन्नितिन्यसंभ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इहहीत्तिरीभात्रणाअदितिवानच्येदइतिभावः वार्तिकमितिनलोपविधायकमित्यर्थः ।५

तिरितिवहुवीहिरितिभावः सगीध्यमानवतीसमिद्धवत्योक्तगर्विशेषो ग्राह्यिष्यमाणेत्तिग्रह्यिष्यमाणासमित्करणीभूतेत्यर्थः निर्मितस्थलमिति
अग्निलाराधाहितिभावः अत्रेत्यर्थेक्तिलिङ्चेतिविशेषविधानेनलोटोवाधसिद्धेऽत्रतुमुन्ग्रहणंचित्यप्रयोजनमित्याहुः अत्रित्स
ताज्ञापार्थेनुशक्येतितज्ञापनेचशक्लिङ्विषयेतद्भावशकावारणायचः साधेकइतिभावः प्रेषाद्यर्हीदित्रविषयेतु अप्रयुक्तेः काचित्क
त्वाद्वासरूपविधित्तात्पर्येकृत्यल्युटोबहुलमितिभावः इतिकृत्यप्र
क्रियाभाष्यकृतोक्तमितिएवंचतत्तोरावुल्युटोरनभिधानंवोध्यंशिल्पिनीतिनटविषयकप्रशस्तशिल्पवत्तिगानकर्तरीत्यर्थः प्राप्तिवोध्यतिसो
पसर्गेतुपूर्वरोगवासिद्धनचनत्वापिसुपीतियोगविभागात्कप्राप्तिः अतोनुपपत्तिसत्रारंभसामर्थ्यान्नत्यकर्मण्युपपदेऽप्रत्ययेतिभावः अणयु
पपदेसुपीतिकोनाकृयुकोः यद्वासत्सुइतिसत्रेउपसर्गेपीत्यनेनान्नप्रकरणेसुप्पदेनोपसर्गोग्रहणान्नेतिभावः पूर्वरोगवासिसुपीत्यनेनेत्यर्थः स्वार्थे
इतिअतएवास्यनित्यकृवचनांतत्वेनतुपाकादिवद्विचनाद्यपीतिभावः नित्यसमासार्थमितिनित्याधिकारस्योपपदसमासार्थमित्यर्थः अकर्तरि
कारकेइतिअतएवसूत्रितंध्येनेऽस्मिन्धान्यानीतिप्रस्थइतिभाष्यव्याख्यानं चिच्छ्रयइतिइत्संज्ञकचकारवभ्रुइत्यर्थः परिभाषालचेति अत्लास
णिकृत्वेन सकर्मकत्वेन चास्यैवग्रहणंवोध्यं हरदत्तादिभिरितिअनेनभाष्यकृतानप्रत्याख्यानमितिध्वनितंतेनेहत्यादिग्रहणस्यसत्रएवनिरू
साचेष्टकृतः प्रत्ययद्वयमपीतिआशयेनभावेवत्युक्तमितिसूचितंअतएवअचोटस्यवाधादेवतस्य वृत्तिकृतः अस्मिन्पक्षेपचादिपाठप
क्षेएवचपक्षभेदफलंवेद्यं मन्यासकृतापूर्वेविधितिषेधमाश्रित्यइतिकश्चित् प्राचावेत्युक्तमितिधीजातमपिपूर्वसूचितमितिवोध्यं नचेतवि
धेःसिद्धविति उत्तरपदादित्यपूर्वपदस्याविशेषणादितिभावः मुम्भवत्यर्थेमितिअन्यथापरत्वान्मुम्नजलान्नस्याङ्गस्यइतिभावः समी
पपरइति समीपमात्रपरोव्याख्यानादिति धीः समीपसमीपगास्त्रिविधनः सचरित्रीतिहस्वविधायकचिहितोजुपस्थितत्वादित्याशयेनाहसमी
पःखित्यन व्ययेत्यादिः केयटस्यस्थमितिअत्रास्थिवीजेउदित्सतिकूलेउपपदेस्जिवहोरनंतरःप्रत्ययइत्यर्थेनक्षतिःनप्रा ग्धातोरितिनियमा



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इतिभविष्यतीति· अतस्त्वेनधातु त्वाच्छस्यइत्यादावतोधातोरितिलोपसिद्धिःस्यानिवत्वेतुनापूर्वविधित्वादितिभावः इत्वाभावार्थंचेतिधातुग्रहणसामर्थ्यात्क्विपो
माप्नोतिभावः मेवमितिन्यायभावः पूर्वधर्मावच्छिन्नोद्देश्यकविधिसत्वनक्रदंतइत्यत्रस्थभाष्यरीत्यास्थानिवत्वस्यदुर्वारत्वात्तन्चधियाधियादावियङ्नस्थानी
स्यापूर्वरूपस्यस्थानिवत्वस्यादितिवाच्य आकारात्पूर्वंचेतिधर्मावच्छिन्नोद्देश्यकत्वाभावात् इवर्णतिधातोर्हिसः एतेनजुहुत्यादयसिद्धिरित्यपक्षेइत्यया
स्तु०धियावित्यत्रैकादेशस्थानेऽल्इतिदीर्घप्रत्ययस्य भीईभियईतिस्थानिवत्सत्रस्थभाष्येतुसोचत्वादियङ्लोकेत्वीदृशप्रयोगोसाधुरेव·परनिमित्त
इत्यपरास्थानिभूतएवगृह्यतेइत्यत्रत्यभाष्ये· नन्ककोऽत्रन्यायस्यापादविषयत्वेनेदंविषयेप्रवृत्तेरितिदूषणांतरमाह अक्रीवित्यादिगणिका
रकेति· स्थाधातोरंतभीवितण्यर्थत्वेशब्दार्थेस्यकमेत्वेनकारकत्वमितिभावः उपसर्गांतरमितिपंचम्यन्तोपसर्गपदेनभिन्नपाठ्यंतरशब्दस्यसमासस्त
नोपसर्गभिन्नमित्यर्थः गिनोसत्यवृत्तिसाधुकारिशब्देइतिशेषः साधुकारिणीतिप्रत्ययार्थशब्दोरितिशेषः गिनिस्थितंतत्रवशब्देइत्यर्थः यद्यपिगि
निरितिअनेनकारीनेकचारिनार्थ्यदीर्घात नत्विति अतएवात्मनेइतिसूत्रेयगर्थंकर्मकर्तृग्रहणमितिवार्तिकेऽप्येवसिद्धिमाश्रित्यभाष्यप्रत्याख्या
ते अन्यथातनादेरुप्रत्ययवारणायवार्तिकमावश्यकमवस्यात् कर्मेगेयछेतिकर्तृवछ्यात्तुनसमासः आत्मग्रहणसामर्थ्यादितिभावः ईत
प्राप्नोमितिपुवत्कर्मधारयेत्यस्यनप्राप्तिः समानाधिकरणाधिकारस्थस्येवकर्मधारयत्वात अत्राभेदान्वयाभावेपिपूर्वपदार्थस्येतरपदेनाभिधा
नाद्दत्तेतिसामानाधिकरण्यमस्त्येवएककविशेष्यकप्रतीतिजनकत्वस्यैवसामानाधिकरण्यपदार्थत्वात अतएवाग्नेमरुद्भ्यांत्वादोमरुतःकपाल
लेपमृच्छब्दार्थस्यैवमरुच्छब्देनाभिधानात्तासामधिकरण्यप्रयुक्तपुंस्त्वसिद्धिरितिदिक् प्रत्ययःप्रत्ययइतिसूत्रस्थप्रत्ययपदार्थस्यऽइतिअर्थः क्विप्
यावर्तेतइतियोगादितिसूत्रेचेत्यात्स्वलिगत्यागेनस्त्रियावर्तेतइत्यर्थः नचहतिभाष्यप्रामाण्यादितिवाच्यं समासस
ज्ञाप्रतिपदिकसंज्ञांतरमध्यज्ञातस्यनमध्यपतितुत्वात् ग्रहणेनग्रहणरूपितद्वयत्वाभावज्ञापनेनेतिभावः नन्वस्मोरित्यस्यार्थवद्ग्रहणज्ञाप
नकारोऽप्रत्ययः स्यादितिवाच्ययेननाप्रातिपदिकसामध्यपवादन्यायेनचसाप्रातिपदिकस्याप्रत्ययनिमित्तज्ञापनेपिस्मोरित्यस्याप्रत्ययनिमित्तार्थज्ञा
पनेमानाभावात् अर्थवद्ग्रहणाभावात्तनित्यत्वात्तत्रप्रवर्तेतेनन्चांतरंगत्वं मपरसिद्धः उत्तरपदाधिकारेतरंगपरिभाषायाअप्रत्ययेतरन्यथापरंतप
इत्यादावनुस्वारेनस्यादितिस्थभाष्ये यत्रप्रातिपदिकस्यैवलक्षणंमानसिद्धांतेत्रस्वलिगत्यागोयत्रतुपदस्यलक्षणंतत्रस्वलिगत्या



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गइतिमर्यादेतिदिक्कर्मणामितीतियत्रेत्यागकरणकव्यापारेशक्तित्रव्यापाररूपभावनायाभाव्यांक्षायां धात्वर्थस्यकरणत्वेनैवोप
स्थितेःस्वतःपुरुषार्थत्वाभावाच्चसुखरूपःस्वर्गोभाव्यत्वनान्वेति०त्यागस्यकरणत्वंचभावनाभाव्यनिर्वर्तनेकृत्यमेवसर्वत्रकरणानामी
दृशमेवकरणत्वंसस्यावचनस्यापेक्षितेष्टसाधनशब्दस्यतुत्यारोपेणत्यागसामानाधिकरण्यात्करणत्वंस्वर्गादेःकर्मत्वमपिभाव्यत्व
रूपमेवनतुफलाश्रयत्वरूपं अतएवदर्शनाकांक्षानन्तरंनवोलेखइतिदिक् लभ्यतेइतिएवंकुमारशीलेयावादिनिसूत्रमपिकुत्सायामि
तिभूतइतिसूत्रभाष्यध्वनितं ततःपरिशेषादितिनस्याप्युदश्यत्वेनकिंपूर्वमेवनिवेशादितिभावः इत्यवधारणाईतइतिनियमेइत्यर्थःकाल
नियमइति अनेनयोदितिभावः निष्ठात्वितिमध्यपदव्याख्यानंतन्निरूढेतरभागादितिभावः प्रकृतिकालेतिनत्याच्चभाष्यं उभयतोनि
यमोयंवस्त्वाश्रित्येवेतिक्विचित् दिगितिदिगर्थस्तद्दृष्टिग्रहणेननिर्वीरुत्यागेतिवान्नविधायकत्वमेवेषांभाष्यकृतामितिं अनेनैवेतत्र
स्या न्यूनपानिसूत्रेणद्वयोरपीतिसीहिंसायामित्यपिग्रहणंनाध्यमननिरूढेति एकदेशत्वादितिभावः द्वाविंशतिरितिपधपिग्रहणस्यना
वश्यकत्वादितिभावः यदाभ्यामित्यननंतत्रसिद्धिरित्यन्यपुनर्नेतिप्रश्नइत्यर्थः कत्ययेचेति [redacted] स्य
भावेबहुनर्थैकप्रत्ययेचस्यापीध्यम् रूपस्येतिइदंचिकारोक्तहेममिप्रायेणभाष्यमितिचिन्नोभोगेतिसूत्रेइतिशब्दः आदिनाग्रेतीत्यस्यनेडि
तिशब्दः अन्यथेति यद्यपिकृतोसिद्धस्तथापितद्धनिमित्तत्वस्यविधेयत्वेनविशेषविहितेनकर्तृगतनिमित्तत्वेनभावकर्मगतकृनिरूपितनिमित्तत्व
स्य वाध्यतइतिभावः विकल्पेभ्नइतिधेरादित्वाभावः चित्यमुद्धतमितिन्नवेयात्यभावादाद्यादित्वफलस्यसत्वादितिभावः दाढइतिढत्वेईतइत्वा
भावमात्रेनिपात्यतामितिभावः धातुविशेषणार्थइति श्यनिर्देशद्वाराधातुविशेषत्वाभ्यर्थइतिभावः अभ्युपेत्यनिर्देशेपीवनापिसेवत्यादेरपिनि
र्देशवत्श्यनानिर्देशस्यकर्तृशक्तयेनक्तिनिर्देशादिभावमभ्युपेत्येर्थः साभ्यासस्येतिएतन्नमाधवरीत्येतिरोध्यं तथाचाहुरितिभाष्यकृतइतिशेषः आ
वर्तनइतिएतेनादेः परस्येत्यादेस्तः स्यादित्ययुक्तं विवक्षितेतिभाष्यायनेचेतिसूत्रभयागादितिभावः भाजनेभाजनपात्र इदंत्विनचासिनासिद्धेतत्र



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रिभाषेति एकानुबंधकपरिभाषेत्यर्थः स्वतंत्र्यमिति लट इत्यस्य नियोगेरिति भावः यज्ञेनसंप्रयुज्यमानेऽग्निकर्तरिशत्रेनस्येतिशेषः अप्रधाने ऋत्विक्त्व
धिकारीतियजमानेत्यर्थः इत्येवेतिएयकपाठेनेत्यर्थः प्रत्ययमाहुरिति अत्रारुच्चिवीजंतुरातपाठस्यबहुसमतत्वभावः साहचर्यात्रेतिधिनुणकर्मकोरणा
मितिभाष्यातेः सकर्मकाच्चेत्यपिवोध्यं इतिविशेषइतिनन्यत्तछोलादिषुतत्त्वाधकः धासरूपन्यायेनसिद्धेरितिभावः एयेतस्येतिपूर्वसत्वस्थप्रत्ययांतसाह
चर्यात्रेतुदंवेरितिभावः नसिध्यादिनिनचतत्रेतिनिक्षुरित्यादिवत्परत्वात३ः प्राप्नोतीतिवाच्यंएधादिभ्याडजभावस्यफलस्यसत्वनाशतेः मलनुरुस्नु
रोधनचेनानुक्रसमुच्चयार्थेनजुगुप्सनादोषुजित्यन्यथाश्रुतभाष्यमिति भवतिरेणपुनः समावेशइतिहिभाष्येउक्तं त्रयाणामेवेतित्रयाणामपीत्यर्थः
व्याख्यानादितिरुटमकारस्तांछीलिकाइत्याह्नेतिसत्रेभाष्योक्तेरितिभावः प्रत्ययाप्रत्ययोरितिन्यायलब्धमेवेत्यलिंगमप्याह गर्गादिर्घिञ्याउः शंस्वि ति
ति आडनसहनिर्देशात्कृत्यर्थशेसेर्नयरुणामितिभावः कथमिति लोककथमितिप्रश्नः स्वरूपाधानेवति अतएवकिंकिनोर्विधानेचरितार्थमितिभावः
नचलिङ्यङ्निदेशाद्भावकर्मणोरप्यतास्यातां उत्पन्नयोः कार्यातिदेशात उत्पत्तिश्चकर्तरिकृदित्येकधाकर्मतयाकर्तर्यव धनेमानइत्यधिकारेणाभूतक
लोपिनानिर्दिश्येइतिरिक् वाहुलकंत्विति ताभ्यामन्यत्रोणाद्यइत्युक्तेरणादिकृपःकर्मण्यपिसंज्ञमित्य गतिकागतिरितिवोध्यं निर्देशादिति
णेधारंस्त्रीमणिरितिभाष्यप्रयोगाद्वेत्यपिवोध्यं एतच्चरत्यनुसारेण दृशेतिशपानिर्देशोदृशस्त्रेनिनलोपइत्यनिदितामितिसत्रेभाष्येदृशनाइति
ओरणादिकक्युनासिद्धं अत एवतनुत्वंमर्दशनमित्यपरः संगच्छतेइतिवोध्यं अर्वाचीनास्त्विति अत्रारुच्चिवीजंतुलोकेऽयामसाधुत्वमेव धा
तुलक्षणत्रप्रत्ययोमानाभावइतिशाकविशेषइतिऋइत्याख्यः गर्तेनिकोसिछिद्रघटलोहमेयदर्घ्याकारसछिद्रेभाषया रणेत्याख्येतरेतिनद सा
कर्मिणितरतिजलमध्इत्यपिवोध्यं चरभंडिचेति भांडचरस्त्याल्पेव कर्मार्थेचन्नंतेनकर्मधारयमधिकरणेचन्नंतेनषष्ठीतत्पुरुषंचेतिपाठः प्रियाल इ
भाषयाचिरोजीत्याख्ये राशयोमेधाः कटुरोहिणी कटुकीलतान्योषधिविशेषः रात्रिकारइतिभसिद्धं अकार्षपापं खरेतीक्ष्णे त्राघुदा
नक्षीनादितियद्यपिन विषयस्येत्याघुदात्तत्वंसिद्धमत्रतथापिपुंस्याघुदात्तार्थंतथैवपुंक्तमितिभावः गंडात् कपोलात् रु विलासिनी ओषधिः ट
त्रत्वगदोरुकविकारः स्वेदनी कटाइतिभाषायां भर्जनमृत्पात्रेच वेरणीस्त्रीणांकेशविन्यासः नकुंदोतिसत्रेचेष्टनस्पेटकुइत्याख्यस्यनाम विं



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वयमेदाद्विघतेइति सौत्रत्वात्र्साधुत्वंगोध्यं इतिपक्षेत्रिनिमुकादस्यतद्विशिष्टलक्षणेतिभावः असारंतुच्छं नदीमेदोविशेषः गयास्थः मलश्लेष्मा
विशेषः निर्विवाहत्वादिनिव वयोरूपाद्यल्पवत्वावसुंदरं पिंगलं वर्णविशेषप्राज्यं बहुपरागयोरिति परागः कौसुमेरेणोस्त्रीयादोरजस्वली
तिबोध्यं भक्तेऽन्नेदने नीचेजनपदे स्थास्थिनस्थूनामिति संज्ञाभाष्यस्थास्थिनस्थूणाभिमिपठ्यतेसच्यष्टा सारमष्टीसव्यष्टासार
थिरितिचोदात्तत्वंकिंचेदभाष्यंनवार्तिकमितिचिन्त्यमेतत् धामे प्रतिकूलेसुंदरे च दृश्यर्थेमितेसम्यगर्थेमित्यभिवाध्यं त्वकाश्रामगेलइतिम
पूका ओषधीविशेषः पारपभृस्यारिति खखवेत्याख्यवृक्षदारुके पक्षिविशेषे किंमिश्रातो सोनकीइतिभाषयाप्रसिद्धे भंभराली भाषयाचरेइति
प्रसिद्धा गोमायुःशृगालःकाऽधारो वाशतेतिस्त्रीकरिणीवेत्यर्थः नवोऽभिन्न नवीनवृक्षः प्रादिसमासेनेति व्यधेरपिवाहुल्काद्दृश्यसमसारराग
इत्यन्येव्यथेरधवाहुलकात्सक्षधकारइतिपरे क्लम्नंतांभाषयापाउलीत्याख्या पापरोगः शीतलाभेदोजलतरंगद्रव्यं व्यवसायोनिश्चयः मक
रालयः समुद्रः अनेकपोहस्ती कुंकुमं केसरं नत्यावधाविन्निकेलोपश्चिस्यंगकविशेषभालवल्ल्यांचेत्यर्थः विषये देशे दत्तधावनेखदिरवृक्षे
फलिनीनिपिचंगुः फलिनीफेली रक्तकालताविशेषः पुंडरीककरिण्यांश्रेष्ठिकोगस्यदिग्गजभार्यायां द्वितीयस्यैनिकुर्योनिधानारित्यर्थः पिटकड
निपिटकः पेटकः वृक्षः शब्दोनीनिभक्षतायामित्यादिः महाभक्षानि पचिव्यादीनि तद्गुणागंधादयः श्लेष्मादोश्लेष्मवातपित्तेषु रसरक्तादि रसरक्त
मांसमेदोमज्जाऽस्थिशुक्राणि अश्रमविक्लमिहरितालादिः आर्तवस्त्रीपुष्पं रोगरोगः संक्रोधेलक्ष्मणिचिह्ने क्षयकृकवीवलइत्याहुरिति अ
त्रारुचिर्वीजंतुकिंपासिद्धेनिपातनेवेत्यर्थोल्लाक्षणिकत्वाद्दृश्यभवोवार्तिकग्रहणाभावेनेकोपरागीतिवरणोऽचिरंच कृशइतिसोत्रइतिकृशान्न
लानीतिकुशलइत्यन्येत्वलीपमङ्गनिजन्मक्षीवः उदारवंकयोरिति उदारवक्रभिन्नेत्यर्थः पुष्पभिन्न पुष्पविशेषः गोदारणो हले तृण
राज स्तालः कुलपथेयमस्तरेइतिसमाहारद्वंद्वः तेषुइत्यर्थः दृष्टिनोषधिविशेषः डिंबिका भाषयाधाडिइत्युच्यते पाशश्चोरादीनांवध
साधनंसत्रमयं परिछदः शिबिकाद्याछादने प्रस्तरांतरेइतिपाषाणविशेषइत्यर्थः चंद्रदारकोविकाधारेतिप्रसिद्धः पोसुलाख्यभिचारिणी
हस्तिसन्नाहोहस्तिकवचं नागरे अभिज्ञे धूम्याटोभ्रमरः खेऽक्षोविटः व्यूहःसेनारचना इत्यस्मान्मनिनेति यद्यनोदात्तत्वमस्येष्यतेतदादृ



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वृध्यमानंसत्वं-सैंहिकेयोराहुः पनग्रहः भाषयापिकृदानीत्साख्येमाभूदिति अकारेफादिभ्यश्चेदमिरम्योरयुनिनियमनेनिभावः इतिवदंतीति अत्रारुचि
धोजनुअमोरमइति मयागवोरणार्थस्तस्यावश्यकृत्वेनानिष्पाद्यत्वेनमानमिति एवंचाद्योद्यइत्यपिसाध्वेवेतिशिक्षाक्षमल्लः पर्युगरोपार्श्वोस्थिम
महेणकावपत्वादिति एवंचपचपाद्युगादिसत्रेइतेतदुक्तिरसगतेतिभावः॥ इत्युणादयः॥ ॥ भावेनुमुनिति अतएवनुमर्थेसतिनिसत्रेनुम
थेइतिचरिताथेअत्रचभावोऽसत्वभूतएवक्रियाश्रयोर्थोलिंगाद्यभावेनसत्यार्थेवचनसएषानुभावोन भाववचनाश्चत्यनेनसत्वभूतेभावेवृत्ता
हीनाभेवविधानाद्येतिभावःसत्यघोत्यमितिउभयत्रापीतिभावःमतनस्तनिअर्थाध्याहारादसंसर्गःषष्ठ्याध्याहारादनुप्रकारइत्यर्थइत्ये
केकेमेप्रवचनोयवुतघोतकत्वंससर्गःमाद्यिघोतकत्वेप्रकारइत्यर्थइत्यन्ये प्रकारएवहितिपक्षेसएवयुक्तइत्याहुरित्युविधाविति अभिधानेतिप्रयोगस्वभा
वचलभ्यइत्यर्थः अनभिधायेत्यत्रप्रयोगोनेतियावत्प्रयोगापाधिरितिसमुदायशक्यइत्यर्थः विविच्यतेगम्यतेतद्दृश्यकहितस्थमित्युच्यतेनजनन
कमात्रामित्याशयः ननुभोजनार्थीतिदृष्टेछायायथादर्शनमनुद्यूतेनतथाभोजनेछयाऽज्ञानुद्यूतेत्यर्थः इत्येवंव्याप्यइतिसमानकर्तृकेष्विच्छिस्प
ष्टार्थमेवेतिभावः नियच्छतीतियस्तुनुन्समानकर्तृकेउपपदइत्यर्थोद्वितीयस्येतिभावः विश्वतोमुखत्वमनेकार्थत्वंहरचलइतिअन्यथातदुपादान
वैयर्थ्यमितिभावः नन्वविवक्षितकर्मण्यपिभावेतः ..... षष्ठीप्रकरणस्थभाष्याल्लभ्यतइतिन्यायेप्यर्थस्वग्रंथविरोधानदूषणमत
आहुःकिंचेति अपिनाकर्तर्यपि नन्वयतुमुनेतितत्प्रकृत्यर्थसमभिव्याहृतक्रियापेक्षयाभविष्यत्त्वस्येवप्रतीतेरितिभावः कर्तुमिच्छतिकर्तुमिच्छ
तस्तौतितदर्थः अस्येच्छाप्राधान्येएवप्रत्ययोरस्यर्थेमानाभावइतिभावः न्यायत्वादितिनज्ञात्वेनेयतुमानिर्वृत्तिनपुनः क्रियार्थेनापीतिभावः
अतएवसनेतस्मिन्नभिप्रेतीतिनविग्रहःसमाना ..... र्थैकत्वाभेनान्यस्यानोचित्यात्स्यङ्चेदसन्विधायकेभाष्ये अयमभिप्रायेत्रा
तएवायस्यार्थिकइतिभूवादिसत्रेकेयटःबाधेप्राप्तेवचनमितिषघप्ययभावोऽसत्वभूतोघञादिवाच्यश्चसत्वभूतस्तयोरेवविभागस्यस्फु प्य
टंबोधनायेदमितिभावः कर्तृत्वविवक्षेतितेनायंकर्तरीतिभावः इत्यादाविति गमेर्नाहरुइत्यत्रयस्यनुबंधस्यव्यवस्थितविभाषयेतिभावः नधाविति
अन्यथेत्यादिः परिच्छित्तिरितिदृश्यतेसर्थः परिच्छेत्तरितिनदुक्तिश्चोदाहरणोध्वेकादिशब्दैःस्पष्टंवसमुदायेनामितिनेदुल्लपदेनकर्मधारयेनस

KKSU LIBRARY
RAMTEK
441 106
M-1873
Dist Nagpur



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुद्दाधिनरक्तप्रसयार्थइतिभावः नत्परिच्छिन्नैकराशिविषयत्वेनेतिबोध्यं एरचीति · निश्चायइतिपाठस्तत्रुच्यदृश्यबोधइतिबोध्यं · नत्वपरिमाणाख्या
याचरितार्थत्वात्प्रातिपदिकमितिः एवमाश्रयैकत्वमपिबोध्यं · कर्मणीति इंचित्यंत्रकर्तरिचेतिसूत्रपर्युदासेनेवकारकलाभेपुनस्तद्ग्रहणपरिमाणाख्या
यामित्यस्यकारकएवप्रवृत्तिर्नतु भावइत्यर्थेतेनेहनएकान्तिलोछिनिर्हस्त्रीः एवंचबजनुक्रमणमजएविषयेऽवचनेहिस्त्रीप्रत्ययानामप्यपवादएवेत्ता
नमितिनतूसूत्रस्थवार्तिकंनकार्यमितिभाष्यसंगच्छतेअन्यथाकर्मणिकृनोबाधाभावापत्तेश्चनस्याश्रयैकत्वेनभाव्यासंगतिःस्पष्टवत्तस्मात्परिमा
णाख्यायाभावेएवकृनोनकारकेनाभिधानादित्यावश्यकंत्रत्वापकर्तरीत्यनुरुत्यानत्रत्याख्यातमित्यन्यत्र नदोषइति · यद्यपिनादिकृधातोरर्थ
नाल्कर्तरिहृनितस्यामित्वात्तिङोपेनेवसिद्धेकृग्विधानंव्यर्थंतथापिक्तवार्तिकभाष्यप्रामाण्यान्नसांप्रदायिकः सइतिभावःनेतदिति एतद्ध्व
नेनकार्यमित्यर्थः ल्युडुपलक्षणत्वस्यापि · यदितुतेतद्धारयेत्यमित्यस्यकर्तरीत्यस्यस्थानेकरणेइतिपठित्वातत्रघापवादइत्रमण्यतादिधाय
णिलुकेत्यणोनादर्तव्यइतिव्याख्यायेतत्समंगवस्यरुचेदंभाष्येअक्षव्यपीति अक्षशकरणकघृतसाधनेष्वप्रीत्यर्थः अयमेवब्रह्मनिरञ्जसमीप
ऽभिव्याप्यशयनस्पर्शयोर्यइत्यर्थेकेएजोपशयइत्सादाविति भावः अग्रमादीति आदिनाइत्कोः अग्रेनिस्थलविशेषमितिन्यग्रमाधारस्थलवि
शेषमित्यर्थः इष्यतेतीतिध्वनितेचेदंघासरूपसूत्रेभाष्येप्रकृतसूत्रस्थभाष्येतुन्यायानुगृहीततद्भाष्यविरोधादेकदेश्युक्तिरितिभावः बाधतइति घास
रूपइत्यस्यबाधकारतिभावः नपुंसकइत्यनरमेवतुनक्लीबे · खल्वर्थेविषयभावेखल्वाद्यामाभवनिति अतएवभाष्ये उक्तंयेकस्यबाधकास्तदर्थस्य
ग्रहणमिति आकाङ्क्षइतिभाष्यमित्यर्थः अयमारंभइतिन्यर्थइत्यर्थः नत्रहिनित्यमित्यादितिद्वेतुर्व्याख्यानमिदं करणइतिनचपरत्वात्ल्यु
दाबाधायतिर्वाहुल्केननदृश्यते : अतएवप्रस्थाद्यधिकरणकृतेत्यत्रभाकरैर्व्यक्तमाख्यातं हिस्याद्यः करणेकिन्युक्तोऽपिबाहुल्केन
वबोध्याः प्राप्तस्येतिभावइति पुरस्तात्पदन्यायेनेतिभावः तेनरक्षुलिनोः स्थापिकास्थापिमितिसिध्यति नकास्तेनेति सौवकंचेतिसूत्रभाष्यादि २
दंलभ्यते अत्रेतिकीर्तरर्पणत्वादितिभावः मरणेभ्यइति · अस्मादयंभावएवेतिभट्टोसंज्ञायामितिसूत्रस्थभाष्यस्वरसः अन्यत्रात्विति संप्र
दानादानाभ्यामन्यत्रत्यस्यतुनात्रविषयस्तेनेणादिशठनप्रसिद्धेरणादिपाठस्यानाविधेयसमर्पकोरणइतिनवाक्यस्थानामवग्रहणादिस्यन्यत्रप्र रम॰ ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पंचिनं अतएवोपाध्यायइत्यत्रापादानेधञिनिइउ॰ अन्यत्रभाष्येध्वनिनं करणाधिकरणयोस्कनशगेत्युटावाधादिनिरिक इत्येवन्याय्यमि
ति किंच यत एयतोभावार्थकयोः स्त्रीत्वायबाहुल्काश्रयणमावश्यक किंचवासरूपस्त्रेसरूपपरेनापवादस्येवग्रहणेना ऽमित्यस्या
पितद्विशेषणेतेवन्याय्येतिवोध्यं॰ मत्वर्थीलक्षयतइतिनतोःसोत्रोलुगितिनत्वं॰ आख्याताइतिबाहुल्कादितिभावः निष्ठायोक्तसेऽइतिनत्वे
वमाइतेसत्यनुपपन्नमितिवाच्ये आशंसायामितिनिर्देशानास्यिनित्यत्वस्वीकारात तत्रलोकप्रसिद्धार्थविशयानाहवधीकरणइत्यादि धात्वा
र्थेतिचेद्विसर्गेभिप्रायेअलाक्षणिककार्यरूपाहपंचसुकदशइति॰ इदमुपलक्षणंसर्वेषांपाणिकस्यभावः क्रमेः संप्रसारणमित्य
पिवोध्यं॰ लाभार्थइतिसकर्मकाकारविकरणवंदिसाहचर्याद्घाख्यानाद्वेतिभावः बहुलमितीति अतएवक्वचिद्वालाथेनिर्देशेपिपूर्वोत्तोसुला
नादिभ्यइतिधात्वंतिकप्रयोगात अतएवक्षत्तेनीशद्धमितिव्याससत्रेसंगछते आत्वनित्यत्वाचेतितुजादेत्वेनेनापिसुलोपाकधारणं निर्भावः
इकः किंत्वेपूर्वचिस्वपीत्यादौनसंप्रसारणंप्रसिद्धत्वेनएवेतिरिक्तार्थेपरत्वेनतत्रतेनैवोध्यवणेनेकरणेदितिप्रतिपादनार्थकनिर्देशपरा
नुरुत्साधनत्वेसंपन्नमितिप्रतिपादनंतत्रेवायमितिभावः चकारइतिसत्रेचकारोविवक्षितइत्याहोसमुच्चयइतिपाठेनात्वर्थीदितिभावः उक्तंच
कारकाणांस्वप्रयोजनमितिविभाषाग्रहणंतल्लक्ष्यभाष्यप्रयोगइत्यपिवोध्यं एजेनकरणंकारश्चस्कारइतिसमासेनेदंसिद्धमित्यर्थात्तेन
चाकारपरत्वात्स्यात्लोपोतन्त्रमाहभत्वाद्धेतिगहादित्वाद्धुइतिमत्वर्थीयस्याप्युवंसिद्धावित्यंवचनंव्यर्थमित्यप्येतत्सपुष्पाणीतिनित्यक्रीडनिसमासः
इत्येवंसिद्धमितिएवंचात्रभावेइत्यर्थेमितिपंक्तेराशयः अतएवेतिकालसमान्यविधानादेवत्यर्थः असंनिधानादितिविशिष्यार्थनिर्देशोनतयो
रेवत्यस्याप्रत्ययोरितिभावः प्रायेणात्वस्यकृत्यमाह केचित्वित्यत्रपक्षेरुचिधीजंतुअत्रभाष्यग्रहणंन कर्तृकारकव्यतिरेकेकृत्यल्युटइतिनावश्य
वेत्तृकर्तरिकारकेइत्यनुवर्तनंतत्रकर्तृत्वेनक्रियावाचकत्वेनचग्रहणमूलकत्वेनेतिनध्वनयन्नाहन्वेवंनतुतत्पदस्यभावेणवृत्तेन्त्रचाकर्मकेभ्यएवेत्यर्थेक्यपेना
त्मनेपदंस्यादाशंस्यफलाभावादप्रयोजनत्वंतत्रोच्चरितंतरांशस्याप्यप्रयोजनत्वंतत्राहतथाहीतिभावोपीति अपिनाकर्मकः अतएवनद्विधायकेकर्तृ



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रीत्यस्यनसंबंध अविशिष्ट इति नीतः तत्वदस्यापिपूर्वमुपस्थितेस्तुल्यत्वादितिभावः आशितः केनेतिनहि आशित शब्दे आधुदात्तविधायके तच्चहिकृते
हीक्तोनिपातनादितिभाव्ये उक्तं सकर्मकत्वादशः कर्त्रभाप्तः क्तोनिपात्यतइतिकैयटोक्तं यदितु अश्येसकर्मकेभ्यः स्यात्तदाभावेक्तं कृत्वातत अश्र्यो आ
घभिकर्त्रर्थकत्वसंभवान्निपातनमपपद्यतेधावनंव्यर्थस्यादितिभावः किंचकर्तृकर्मणोरितिसूत्रेकृतपूर्वीकटमित्यत्रभावेक्तसिद्धयेऽविवक्षितकर्मक
त्वाश्रयणंभाष्येहृतंतदसंगतिरित्यपिबोध्यं समर्थनीयमिति भ्रातेदंशमित्यपिकृतपूर्वीकटमितिवद्भावेकेसाधु वस्तुतस्तत्रगत्यर्थत्वात्सकर्म
कत्वेपिभावेक्तः केनतेभ्योविशिष्यतइतिवोरर्थेयोस्तद्धितानात तयोरित्यचनतस्तस्यग्रहणंपूर्वोपस्थितेः केनस्यनिराकांक्षत्वात इत्यत्र कर्मणीति
संसर्गोरिसेपेक्षत्वेतिभावः कर्तरीचप्रत्यासत्त्याविधेयप्रकृत्यर्थनिरूपितबोध्यं एवंजिति पचाद्यचोभ्यत्रग्रहणमित्यन्ये उपसर्गेरेवेतिस्वल्लब्धो
रेवेतिनियमस्तुनव्याख्यानादितिभावः वेयर्थ्यापत्तेरितिकिंचचोपिव्यर्थः यदुत्तरंचशब्दस्तत्सदृशसमुच्चयांगीकारेणोपदसमुच्चयासंभवादि
त्यपिबोध्यः अथसंगतेरितिअभूततद्भावस्यसत्तायैएवसंभवाननुप्राप्तयैएवमवटोवटः करोतीत्यर्थेवटीकरोतीत्यस्यासंभवइतिभावः अत्रव्य
हितमात्रंमर्यादेति उत्तरंगविकल्पस्यतस्यादित्युत्तरस्यत्यस्यप्रकृतेरितिभावः मुमःसंभवादितिईषदर्थेअभवइत्यादेरित्यर्थपरेस्थरवत्लोनुभि
धाचमितिनामग्धानोरितिसूत्रस्थभाष्यसूचसः गत्यादिति आङिनोपसर्गत्वेकेचित्तुव्यवहिताश्रयनियोगविभागात्तत्रछंदसीत्यननुरुत्सालोकपिकृविध्य
वहितप्रयोगज्ञापनान्नदोषः अतएवसंज्ञानियमप्रयोगनियमपक्षयोर्नफलभेदइत्याहुः इहतदभ्युपगमइत्यधिकारादृध्येकृचिक्षासरूपविधरभा
वेक्तनज्ञाप्यतइतिभावः मेऽविशिष्टस्यत्यर्थः नित्यव्यतीहारेतसंवर्त्तिनेतुमाऽइतिभावः समासइतिगतिसमासइत्यर्थः परावरेतिअवरशब्दात्पूर्वे
टतिपाची परावरशब्दयोः संबंधिशब्दत्वात्मदपेक्षपरावरत्वेगम्यतेतयोः परावराभ्यांयोगोबोध्यः सचक्रियाद्वारकोधेनसाक्षात्क्रियया सर्वोप्यत्र
ग्रहणेतत्रयस्ययत्क्रियाद्वारकः संबंधोयथाक्रियायातद्वाचकात्कात्आघोरङ्गणेस्थितइतिशेषः पूर्ववत्वादिकंचतत्तस्यरङ्गतत्तदवधिभेदनभि
न्नंतत्तदवधिसंबंधशब्दस्यानामेतिमात्स्यविरहेतिमाङ्निषेधाभावेइत्यर्थः सचसामानाधिकरण्यसंबंधेनपर्वतकर्तृकस्थितान्वयेतितत्तद्विशिष्टदृश



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कानुविषयेइतिइतिभाष्यकैयटयोःस्पष्टं उक्तार्थानामितिन्यायस्यनुनार्थविषयः तस्मान्नित्यत्वानएतद्ग्रध्वक्षपतामाभाष्यकृतोक्तं इहकस्मान्नभवति
आस्यतेभोक्तुमितिअन्यथानत्वनुमुनानारभ्यैवोधक्रियापूर्वकालत्वस्यासनक्रियातित्वात्तदत्रचोतनदसर्गतिःस्मछेवउक्तंचकैयटनत्रासपूर्व
कालत्वाद्भावस्यचप्रतिपाद्यत्वादासित्वाभोक्तुमितिप्राप्नोतीतिभावइतियासरूपन्यायेनलडितिसमाहितमित्यनुक्त्वाभावपूर्वकालत्वि
शिष्टक्रियावाचकत्वंतुमुन्समभिव्याहारादितितदाशयः नहितत्रासनोत्तरंकालेभोजनमितिबोधःकस्यापिसम्मतःभोजनफलंपूर्वकाल
सासनमितिबोधस्तुभाष्यसंमतः अन्येभ्योभोक्तृभ्यःपूर्वंभुक्त्वाऽन्येभ्योनन्तरंव्रजतीत्यर्थेतुपूर्वंभुक्त्वापश्चाद्व्रजतीत्युचितमेवेत्याहुःसमानकर्तृ
कत्वेतुनक्त्वाकेचिद्धात्यतादिभावेमानानएम्यत्वान्नतस्यक्त्वाघोत्पत्तौ इतिन्यायादितिमत्तु अननन्यायेनाख्यातोपस्थितक्रियाविशेषणत्वे
एवायंसाधुरितितत्त्वचन्द्रोक्तिरितिसत्त्वस्यत्राहुस्तत्त्वचोपछाद्यमितिभाष्यप्रयोगश्शत्रशब्दप्रतिपाद्यशास्त्रकरणकशासनक्रियायांविशेषणत्वे
वैकात्याच्चोपःप्रत्ययइतिकैयटोक्तेः अतएवभुक्त्वागतइत्यादिप्रयोगोपप निःक्रियान्तरान्वितक्रियायानान्वयइत्यवमूलतात्पर्यंतत्तद्भा
ष्यनंत्यमेतिवक्तव्यंनवक्तव्यंसर्वेषामत्रव्रजिक्रियाप्रतिपोर्वकृत्यमतएवानियमःप्रयोगइति नचक्त्वाफल्क्त्वाघञ्योःसर्वत्रोपधग्रहणमिति
वाच्यंतस्मिन्कृतेपिनकृतिनिषेधनार्फिलेत्यस्याघनडुर्णयादितीयस्यातेनविकल्पेनक्त्वाफिलेत्यस्यडुर्णयाचविशेषाभावात् नचचुरादीनामनि
त्यएवायंतत्पाठोज्ञापकइतिव्याख्यासाचरितार्थमितिवाच्यं सर्वेषामनित्यएवंतत्वेमानाभावानतत्पूर्वपदस्यस्थितिक्रातोत्तरपदकस्यत्यर्थः
तेनपरमक्त्वेत्यादौस्त्रोत्वाकालकइत्यादौमम्पूर्व्यसकादिसमासेचनदोषइतिभावः अननइत्यत्रसिद्धपूर्व ग्रहणंव्यर्थमितिध्वनितेमनन्नोधापूर्व
स्थितिभाष्येणक्रमश्चक्त्वाक्त्वाअनुनासिकस्येत्यस्याप्युपलक्षणमिदंत्वस्याप्यभावइतितादिकित्वाभावेनलपिकृतेतरप्राप्तेःस्पष्टः पूर्वमपिनांतरंगानपो
क्षित्वायातः आरभसामर्थ्यमितितेनत्वस्यानिवृत्तावकृतव्यधानेपिप्रत्ययस्थितिरितिभावः स्थिरइतइतिनिपातेनपतिदरिद्रातीतिविकल्पितेटत्वादिति
भावः भाष्योदाहरणावलनेनेति एकोऽपदइत्यत्रविशिनविशेषणसमासेतीतिचिंत्यप्रयोजनमितितद्भावः अथवेत्यादिन्यायः पुंस्यिनितिसूत्रकैयटानुसारे
णाकृत्वसुचोनसन्चिंत्यमितिभागेवृनिवेदितं दिगितिदिगर्थस्यकृत्यलुपूर्वपदस्यादितिबहुव्रीहावबध्यबधितोःसाजात्येनबाधेस्यान्यपदार्थेनयावर्णजाति



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग्रहणान्नदोषः नचैवंसतिचिकीर्ष्येत्यादौदोषः जातिग्रहणेनैकग्रहणेपिवर्णक्षयस्यैवग्रहणात् अतएवसनिमित्तेत्युत्तरंभट्टेनापि उपध्यधीमितिदेभरपी
तीत्याभ्यांनलोपसंयोगादिलोपाभ्यांसिद्धेरिति विधानचरितार्थइत्यभावेहिसत्यभेदेनिवर्णोन्वयस्तेनकृत्वानापत्तेः अइउऋपेहीत्यादावपिषकारेणप्रत्याहा
रस्यैवग्रहणात् नचैवंसतिसनिमित्तेत्यनेनैवसिद्धेः किंसनिमित्तेत्यनेनेति वाच्यं तेनाकरणात्तस्यैवान्येभ्योभाक्त्वेनसाधनपौर्वकाल्यविषयाणामेवाग्रादीनाग्रहणमत्रेतिसमानकर्तृकयोरितिसूत्रेभाष्यकैयटाभ्यामुक्त्वादितिभावः एवमु
क्तेतिक्तसूत्रविहितक्त्वाप्युपलक्षणं स्वादिकारमितिरित्वतीतिहेत्वेमुमितिभावः एतेदोषाइतिचेत्सिद्धेस्वादीकारमितिप्रसज्येतेतिविशेषः नचप्रसज्यसंनियोगेनमुनोविधा
नारंतत्रतेनपूर्वप्रयोगेनैतेदोषाइतिवाच्यंसुबंतस्योपपदत्वेनाभिषक्तस्तनादिषुतत्तः प्रवर्तनेसोविभक्तंतइतिभाष्योक्तरीत्यास्वार्थेद्रव्यलिंगसंख्यानोक्तमिकत्वेनसुपः
मागवृत्तीषः प्रत्ययस्यादेशात्इतीभावः निपात्यंतइतिननुनिपातनमाश्रित्यखमुनेविधीयतांकिंणमुलेतिचेन्नखमुन्निरूप्यायेनविनिपातनंस्यादितिन्यायेनापातनात्
णमुलित्यपूर्वविधीयमानत्वसंभवेयुत्तरार्थंचणमुलित्यपूर्वविधीयमानत्वसंभवेयुत्तरार्थंचणमुलितिकैयटाद्यः भावप्रत्ययमात्रेतिणत्वंकरणस्यभावप्रत्यय
मात्रविषयकंनिपातनमितिहरदत्तोक्तेरितिभावः परंतुणमुलविषयमेवंनिपातनेअतएवास्वार्थेसाधुकृत्वेतिभाष्यसंगच्छते अन्यथासाक्षात्प्रभृतिष्वितिसूत्रभ
ष्योक्तरीत्यासामान्यत्वेनिपातनमित्यस्यस्वादुशब्दस्यस्वादुमात्रइत्यर्थेलिंगविशिष्टपरिभाषयातस्यापितत्रादेशायनावसंगतेः स्यष्टेचेतिहरदत्तोक्तेरसंगतास्वादुकृत्व
स्यस्वादुमनेनूत्वेत्यर्थः ।३पपदत्वाभावान्नसमासइत्याहुः ।इत्यपीति।स्वादुकारमित्यपेरर्थः।विशेषणत्वेनेति।अभेदेनेत्यर्थः।सर्वथाभेदाभावेदि
षणविशेष्यभावस्यासंभवादाह।एकस्यापीति।काष्ण्यपार्थक्यानेति।अर्थक्लेसंभवतितथाकृत्यनानुचितत्वेत्यपिबोध्यं।इत्थमेवेति।सत्यानृतमिथुनी
करणंविनालोकव्यवहारासिद्धेरितिभावः।दर्शनविषयीभूतादिति।साकल्यमपितदपेक्षयेवबोध्यं।यद्वायंतइतिधातूनामनेकार्थत्वादार्द्रीकरणेक्तेपे
र्थइत्यन्ये।प्रतिविशेषणमितिअत्रप्रकरणेग्राह्यबोधमात्रीयेकिंचिद्वैदृश्यमाश्रित्यणमुहंतानामनुशासनबलात्साधुत्वबोध्यं।तद्धिकरणेइत्ये
वेति।एतेनदत्तेनेत्यपदमुक्तइत्यादिवचनेनचरितार्थमित्यपास्तं।नचरध्वासहसक्तूभुंक्तइत्यर्थेदध्युपदंसक्तूभुंक्तइत्यत्तसिध्यर्थंतृतीयाग्रहणं
चरितार्थं।तादृशेविषयेउपदंशानिरूपितार्थकर्मत्वस्यापिसत्वेनोपपदविभक्तेरितिन्यायेनतृतीयायादुर्दुर्भवातेनचवचनसामर्थ्यात्समासप्र
त्ययोत्पत्तावपिमूलकेनोपदंशमित्यत्रसमासाभावपक्षेदूङ्हणपरिभाषयाविशिष्टेप्रातिपदिकसंज्ञोपादनसमासग्रहणदुत्तनियमेवारणाच्च न



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संगतेस्यात्। प्रत्यासत्यावृत्त्यर्थं निरूपितकारकत्वस्येवग्रहणादितिवाच्यं। उपदेशे कर्मत्वेनाप्यार्थान्वयसत्त्वात्तन्निरूपितकारकत्वाक्षतेः। विभक्तिस्तुप्रधा
नानुरोधिनीतृतीयेवपरत्वाच्चेतिबोध्यं। स्थितमावरइति। धनुरिभ्यस्ह्यंमुष्टिपीडंदधानइतिभट्टिप्रयोगेतुनणसूत्रंकिंतुघञन्तक्रियाविशेषणत्वा
च्चतृतीयेतिबोध्यं। नविलुप्तविभक्तिकमिति। एतच्चहरदत्तग्रंथेस्पष्टं। सोत्रत्यान्तत्साधित्यन्यं। अनन्तुसाधित्यागमनप्रतिबंधकमनृजुत्वंभग्रतःस्थितंकाष्ठ
मित्यर्थः। तत्रयद्यपीति। तत्स्त्र्यर्थंतेस्वांगेउपपदइत्यर्थः। सूचितः। इहेति। प्रत्ययथोःपरत्वेश्चेत्यर्थः। नेष्यतइतियथासंख्यसूत्रस्थभाष्यप्रामाण्यादि
तिभावः। नार्थइति। वस्तुतस्तदनित्यत्वस्योपकृत्तेनसनःतिचीत्यादौसनुघातोर्ग्रहणंसिध्यति। अनुवर्त्यति। एकाचइत्यतइतिभावः। सिद्धमिति। एवं
च्वर्थांशेनार्थग्रहणोपयोगइतिभावः। निरवधकपरिभाषायामनित्यत्वेतुनांशेपिनोपयोगइतिबोध्यं। भूग्रहणमिति। अतएवच्च्यर्थइतिनानुवर्त्त
तइतिभावः। इतिआगमेवेति। सोत्रोनिर्देशादितिभाष्यादतएवप्रकृतिवदिस्तिरश्चोनित्यइतितद्भावः। कृतुकेवेति। उपपदसमासोपिनेतिबोध्यमिति
भूवेवइतिश्रीमद्दीक्षितभट्टोक्तिपोत्रदीक्षितहरिवल्लभचित्तं लघुशब्दरत्नवृत्तेसंपूर्णं। ६:। तेषपीति। निर्देशेसत्यपीति। तत्समुदायांतर्गताःकेचि
दपीत्यर्थः। नियम्यतइति। अत्रपक्षेतेइत्यस्यजातिपरत्वेनव्याहतमित्यादोनदोषः। अतएवगतिरनेतरइत्यत्रानेतरग्रहणंचरितार्थं। एषासंज्ञेतितत्स्व
रेवाक्यतयेतिभावः। स्तनहयमितिं। अनुकरणंचेतिसन्नेऽनितिपरग्रहणंचेत्यपिबोध्यं। वृत्तिग्रंथोपीति। सुकृटकरणीतिभाष्यग्रंथोप्यर्थः। इति
प्रथमोध्यायः। भिन्नेति। यवाग्वेत्तितृतीयाग्निहोत्रमितिद्वितीयेतिभावः। भेदमात्रस्येति। स्वरूपभेदमात्रस्येत्यर्थः। भिन्नार्थकविभक्त्यवरुद्धयो
रेवनतथान्वयइतिभावः। एकविभक्तिकत्वंनियमेइति। एकस्याआवृत्तेश्चस्थितः प्रयोगोनद्वितीयस्यास्तृतीयस्याश्चभवतीतिवृद्धानुन्नयुज्यत
इतिसूत्रेभाष्येऽक्तचारितिभावः। करणेद्वितीयेति। अयंभावः। अग्निहोत्रंजुहुयात्कर्मनामधेयं। सएषयज्ञःपंचविधोग्निहोत्रंदर्शपूर्णमासावि
त्यादिर्नानाहूयतेत्यज्यतेस्मिन्निति होत्रं। अग्नेर्होत्रमितिसमासः। अतएवकेषांचिदेतोदात्तपाठः श्रुतौ। अतएव चाग्निरात्रो
ख्येनेष्टभावयेदित्यर्थइतिं। तत्रसूत्रेति। कर्मणीत्यधिकारस्थानापिभाष्यंति। तत्रतत्तो या। विधानार्थमिदं। द्वितीयात्कर्मणीत्यवसिद्धंतिनोक्तं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विवक्षीति। वक्षीति प्राप्तं। वैकल्पादिति। एवं च क्षिग्रहणमपि व्यर्थं। सिच इत्यनुवर्त्यतस्येवलुकासिद्धेः भादिः सिच इत्यस्यवैकल्पिकृतयारूपांतरस्यानापाद्यत्वेन
तदप्रवृत्यर्थं क्षिग्रहणमित्यपिनश्चेत्यमित्यपिबोध्यं। इतिद्वितीयः। प्रागुक्तेति। दृशोरुडिमंत्रेचसेतिसूत्रेकिसार्वधातुकगुणइत्यपिबोध्यं। इडपक्षेत्विति
नेडितिसूत्रेप्रतिषेधाद्गुणोनपक्षे। चुरादावदंतइति। तस्माण्णिचिचडिणोर्वृत्तस्याल्लोपस्यस्थानिवत्वान्नेगादृस्यदृक्षेति। अग्लोपित्वान्नसन्वद्भावदीर्घौपधा
ह्रस्वत्वानि। तत्रोदितवादेर्मात्रमिति। संज्ञापूर्वकविधेरनित्यतायाभाष्यासंमतत्वाच्चेत्यपिबोध्यं। भदादिरिति। सूत्रेदृतिर्दीर्घपाठउदरंह्रस्वपाठेत्वदृते
तिबोध्यं। भायंतविपर्यासमिति। प्रत्ययव्ययमित्यपिबोध्यं। तत्तेषत्वनिपातनादिति। ननुप्रयोगदृश्येनयतेरेवप्रवृत्तिरित्याह्नतुर्भ्यइत्यसंगतमतआह
उपसर्गभेदादिति। न्याय्यत्वाच्चेति। अकारविशिष्टयोरेवसूत्रेपाठाच्चेत्यपिबोध्यं। पादीतइति। सूत्रस्थारस्यनापादादावपीष्टत्वेनेदंचिंत्यानिपातनमि
ति। धात्वादेषसमासानामितिवोध्यं। वहेःकर्मणीति। श्वेतेरश्वतइतिश्वेतवाहः। युक्थइति। युक्थेरक्थानिवासंत्यक्थगाः। कर्मणिचेति। पुरोदा
श्यतेपुरोडाशः। संप्रसारणंवृतेइति। परस्यविभज्यान्वाख्यानेतरंगपरिभाषायाअनित्यत्वादनाश्रयणेननित्यत्वात्संप्रसारणंवृतेइत्यर्थः। ज्ञवस
वयोर्ज्ञस्यप्रवृत्तौ। स्वरार्थमिति। एवं चवषादेर्ज्ञवसवोच्छरसीत्यस्यपाठः प्रागादिकइतिभावः। विकरणइति। करोतेरित्यादौ। विकरणस्यगुणइति। करो
तेरस्याभावश्चेत्यपिबोध्यं। क्वचिन्नेति। गुणइतिदोषः। परस्मैपदमिति। पीटसिपइतिबोध्यं। भादितिवसइतिदोषः। आदितिलेटइत्यर्थः। क्षिप्तौच
ण्णेनेति। क्षिप्तेःकुरिलृपापः। स्त्रंसुध्वंसुप्रभृतिभ्यइति। छंदसिसर्वेभ्यः किकिनोवाच्यावित्युक्तेरितिभावः। अगुणेइतिगुणाभावेइत्यर्थः। इयदि-तिश्रि
ञसेवाथामित्यस्यण्यंतादिति। मंदरितिदोषः। ग्रहिस्यपीति। भपिनाबाहुलकात्यगभावमात्रमित्यपिबोध्यं। लुप्तेति। पिबध्येइत्यत्रायुदात्तपाठादितिभा
वः। डिस्वबोध्यमिति। एवं चतवेदःव्यर्थइतिभावः। इत्यव्ययत्वादिति। अन्यत्रवृत्तेऽतइत्यव्ययत्वबोध्यं। सन्नंतादिति। कंत्यप्रत्ययेः इत्यर्थइति। वृजस्व
नित्तिबोध्यं। रेफस्यविसर्गइति। एवंचैकस्त्वमितिरूपमितिभावः। एयप्रत्ययइति। चक्षिङःख्याञ्भ्यादिः। ख्यारावितिसंतिष्ठतेपित्यत्रेत्यादिभाष्यार्थः
इतिनतीयः। एवंयातव्येति। यातूनांहननीत्यर्थः। यूद्योगकर्मणिषष्ठी। यातुरक्षसीपर्यायो। बहुवचनंतादृष्ट्यानेस्तुत्यर्थं। बहूनांतेषांहननंहिस्तुतिर्भवति



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

KKSU LIBRARY
RAMTEK
441 106
M-1873
Dist Nagpur

[OrderDescription]
,CREATED=20.10.20 14:14
,TRANSFERRED=2020/10/20 at 14:17:54
,PAGES=20
,TYPE=STD
,NAME=S0004225
,Book Name=M-1873-LAGHUSHABD RATAN
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE20=00000020.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection